शुचित्वं पादहस्तयोः । असंश्लेषः परस्त्रीणां शारीरं शौचमिष्यते” वृह० । “उच्छिष्टोपघातेऽभ्युक्षणाच्छुचिर्विण्मूत्रं संसृज्योन्मृज्याचम्य प्रयतोभवेत्” पैठी० “प्राणिनामथ सर्वेषां मृद्भिरद्भिश्च कारयेत् । अत्यन्तोपहतानाञ्च शौचं नान्यत्” विष्णुः । “विण्मूत्रोत्सर्गशुद्ध्यर्थं मृद्वार्य्यादेयमर्थवत् । दैहिकानां मलानाञ्च शुद्धिषु द्वादशस्वपि । वसा शुक्रमसृङ् मज्जा मूत्रविट् घ्राणकर्णविट् । श्लेष्माश्रु दूषिकास्वेदो द्वादशैते नृणां मलाः” मनुः “तथा शरीरस्रोतोभ्यो मलनिष्यन्दविस्रवः । अन्नादीनां प्रदेशस्य स्यादशुचिर्विशेषतः । प्रभूताशुच्यमेध्यानां स्पर्शनाच्चाशुचिर्भवेत् । स्वप्नाद्वस्त्रविपर्य्यासात् क्षुताद्भूमिपरिभ्रमात् । उक्त्वा वाचमनाच्छुद्धिरन्ततं क्रूरमेव वा। अपविद्धं धनुर्लक्ष्यं दृष्ट्वा वा अशुचिर्भवेत् । प्रलेपस्नेहगन्धानामशुचौ चापकर्षणम् । शौचलक्षणमित्याहुर्मृदम्भोगोमयादिभिः । लेपे स्नेहे च गन्धे च व्यपकृष्टे च दूरतः । पश्चादाचमनञ्चैव शौचार्थं वक्ष्यते विधिः” देवलः । “दुष्टाभिशस्तपतिततिर्य्यगधोवर्णोपहतानां संस्पर्शाच्चाश्रुस्वेदतोयपूयशोणितच्छर्द्दिलालानिष्ठीवितरेणुकर्द्दमोच्छिष्टजलविण्मूत्रपुरीषादिभिर्बाह्यशरीरोपघातिभिरुपपूताभिरद्भिर्मृद्भिश्च भस्मगोमयौषधिमङ्गलाचारविधिप्रयुक्तैर्बाह्यशरीरोपघातात् पूतोभवति” हारीतः । “चिताधूमसेवने सर्व्वे वर्णाः स्नानमाचरेयुः । मैथुने दुःस्वप्ने रुधिरोपगतकण्ठे वमनविरेकयोश्च । श्मश्रुकर्म्मणि कृते च । शवं शवस्पृशञ्च स्पृष्ट्वा रजस्वलाचाण्डालयूपांश्च । भक्ष्यवर्ज्जं पञ्चनखशवं तदस्थि सस्नेहञ्च । सर्व्वेष्वेतेषु पूर्व्वं वस्त्रं नाप्रक्षालितं बिभृयात् । रजस्वला चतुर्थेऽह्नि स्नानाच्छुद्ध्यति । रजस्वला हीनवर्णां रजस्वलां स्पृष्ट्वा न तावदश्नीयाद्यावन्न शुद्धा । सवर्णामधिकवर्णां वा स्पृष्ट्वा स्नात्वाऽश्नीयात् । क्षुत्वा सुप्त्वा भोजनाध्ययने पीत्वा स्नात्वा निष्ठीव्य वासः परिधाय रथ्यामाक्रम्य मूत्रपुरीषे कृत्वा पञ्चनखस्य सस्नेहास्थि स्पृष्ट्वा चाचामेत् । चाण्डालम्लेच्छसम्भाषणे च । नाभेरधस्तात् प्रबाहुषु च कायिकैर्मलैः सुराभिर्वोपहतोमृत्तोयैस्तदङ्गं प्रक्षाल्य शुध्यति । अन्यत्रोपहतोमृत्तोयैस्तदङ्गं प्रक्षाल्य स्नानेन । वक्त्रोपहतस्तूपोष्य स्नात्वा पञ्चगव्येन । दशनच्छदोपहतश्च । वसा शुक्रमसृङ्मज्जामूत्रविट्कर्णविड्नखाः । श्लेष्माश्रु दूषिका मेदोद्वादशैते नृणां मलाः । गौड़ी माध्वी च पैष्टी च विज्ञेया त्रिविधा सुरा । यथैवैका तथा सर्व्वा न पातव्या द्विजातिभिः । माधूकमैक्षवं टाङ्कं कौलं खार्ज्जूरपानसे । मृद्वीकारसमाध्वीके मैरेयं नारिकेलजम् । अमेध्यानि दशैतानि मद्यानि ब्राह्मणस्य च । राजन्यश्चैव वैश्यश्च स्पृष्ट्वैतानि न दुष्यतः “स्नानं तपोऽग्निराहारोमृन्मनोवार्य्युपाञ्जनम् । वायुःकर्म्मार्ककालौ च शुद्धिकर्त्तॄणि देहिनाम्” विष्णुः । “ऊर्द्ध्वं नाभेः करौ मुक्त्वा यदङ्गमुपहन्यते । तत्र स्नानमधस्तात्तु क्षालनेनैव शुध्यति । इन्द्रियेऽनुप्रविष्टं स्यादमेध्यं यदि कर्हिचित् । मुखेऽपि संस्पृश्यमानं तत्र स्नानं विशोधनम्” अङ्गि० । “रथ्या कर्द्दमतोयेन ष्ठीवनाद्येन वा तथा । नाभेरूर्द्ध्वं नरः स्पृष्टः सद्यः स्नानेन शुध्यति” “शङ्खः “स कर्द्दमेषु वर्षासु प्रविश्य ग्रामसङ्करम् । जङ्घाभ्यां मृत्तिकास्तिस्रः पद्भ्यां च द्विगुणाः स्मृताः” यमः । “दिवाकीर्त्तिमुदक्यां च सूतिकां पतितं तथा । शवं तत्स्पृष्टिनञ्चैव स्पृष्ट्वा स्नानेन शुध्यति । आचम्य प्रयतोनित्यं जपेदशुचिदर्शनात् । सौर्य्यान्मन्त्रान् यथोत्साहं पावमानीश्च शक्तितः । नारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा विप्रोविशुध्यति । आचम्यैव तु निःस्नेहं गां स्पृष्ट्वा वीक्ष्य वा रविम् । वान्तोविरेकी स्नात्वा च घृतप्राशनमाचरेत् आचामेदेव भुक्त्वान्नं स्नानं मैथुनिनः स्मृतम्” मनुः । मैथुनिनः स्नानस्मृतौ गर्भशङ्कायामेव “अन्तौ तु यदा गच्छेच्छौचं मूत्रपुरीषवत्” शातातपोक्तेः । “अजीर्णेऽभ्युदिते वान्ते श्मश्रुकर्म्मणि मैथुने । दुःस्वप्ने दुर्जनस्पर्शे स्नानमात्रं विधीयते । शुना चैव श्वपाकेन मृतनिर्हारकेण वा । स्पृष्टमात्रस्तु कुर्व्वीत सेचनं प्लावनं जलैः” मनुः “दुःस्वप्नदर्शने चैव वान्ते वा क्षुरकर्म्मणि । मैथुने कटधूमे च सद्यः स्नानं विधीयते। पतितं सूतिकामन्त्यं शवं स्पृष्ट्वा तु कामतः । स्नात्वा सचेलं कृत्वाग्निं घृतं प्राश्य विशुध्यति । शवस्पृशं दिवाकीर्त्तिं चितायूपं रजस्वलाम् । स्पृष्ट्वा प्रमादतोविप्रः स्नानं कृत्वा विशुध्यति” वृह० । उदक्याशुचिभिः स्नायात्” या०स्मृ० उदक्यादिस्पृष्टैः स्पृष्टः स्नायात् हेमा० । “चण्डालं पतितं व्यङ्गमुन्मत्तं शवमन्त्यजम् । सूतकं सूतिकां नारीं रजसा च परिप्लुताम् । श्वकुक्कुटवराहांश्च ग्राम्यान् संस्पृश्य मानवः । सचेलं सशिरः स्नातः तदानीमेव शुध्यति । वृद्धशाता० । “श्वपाकं पतितं व्यङ्गमुन्मत्तं शवहारकम् । सूतकमित्यादि शातातपवत्” परा० “अशुद्धान् स्वयमेवैतान् शुद्धश्च यदा स्पृशेत् । विशुध्यत्युपवासेन” “उपस्पृश्याशुचिस्पृष्टं तृतीयमपि मानवः । हस्तौ पादौ च तोयेन